**বেদান্তসম্মতম্ অপবাদস্বরূপম্(5Marks)**

শ্রীসদানন্দযোগীন্দ্রসরস্বতীপ্রণীতঃ"**বেদান্তসারঃ'**একঃ প্রকরণগ্রন্থঃ।অস্মিন্ গ্রন্থে অপবাদ প্রসঙ্গম্ আলোচিতম্। অধুনা ময়া বেদান্তসারসম্মতং অপবাদ প্রসঙ্গং লিখ্যতে।

**"অপবাদঃ নাম-রজ্জুবিবর্তস্য সর্পস্য রজ্জুমাত্রত্ববৎ বস্তুবিবর্তস্য অবস্তুনঃঅজ্ঞানাদেঃ প্রপঞ্চস্য বস্তুমাত্রত্বম্।"**অপবাদো নাম কারণমাত্রাবশেষণং কার্যস্য,যথা রজ্জৌ সর্পস্য,শুক্তৌ রজতস্য বা প্রতীতৌ রজ্জুবিবর্তস্য সর্পস্য,শুক্তিবিবর্তস্য রজতস্য বা অপবাদঃ বিনাশঃ, অধিষ্ঠানভূতরজ্জুমাত্রতয়া,শুক্তিমাত্রতয়া বা অবস্থানম্, তথৈব পরমাত্মবস্তুনি তৎবিবর্তভূতাজ্ঞানাদিমিথ্যাপ্রপঞ্চস্য চৈতন্যবস্তুমাত্রাবশেষতয়া অবস্থানম্ এব অপবাদঃ।ইত্থং যথার্থরূপেণ অবস্থিতে বস্তুনি মিথ্যাপ্রতীতিরূপান্যথাভাবো দ্বিধা ভবতি, **পরিণামভাবঃ বিবর্তভাবশ্চ।**পরিণামো নাম স্বকীয়ং যথার্থরূপং পরিত্যজ্য স্বরূপান্তরাসত্তিঃ,যথা দুগ্ধস্য দধিরূপাসত্তিঃ। বিবর্তো নাম বস্তুনঃ স্বরূপাপরিত্যাগেন বস্ত্বন্তরমিথ্যাপ্রতীতিঃ অধ্যাসঃ বা,যথা রজ্জৌ সর্পপ্রতীতিঃ।তথা চোক্তম্-

**"সতত্ত্বতোই ন্যথাপ্রথাবিকার ইত্যুদীরিতঃ।**

**অতত্ত্বতোই ন্যথাপ্রথা বিবর্ত ইত্যুদাহৃতঃ।।"**সমগ্রসাংসারিকপ্রপঞ্চস্য লয়প্রকারো বর্ণয়ন্ আহ, তথাহি। যদ্ এতচ্চতুর্বিধসকলস্থূলশরীরজাতং সুখ-দুঃখাদিকং ভোগায়তনং,তৎভোগ্যরূপম্ অন্নপানাদিকং ভূরাদিচতুর্দশলোকসহিতং ভুবনত্রয়ম্,তদাশ্রয়ভূতং সর্বং ব্রহ্মাণ্ডঞ্চ স্বকারণভূতেষু পঞ্চীকৃতমহাভূতেষু বিলীয়তে।তানি চ পঞ্চীকৃতানি মহাভূতানি শব্দ রূপরসগন্ধস্পর্শবিষয়সহিতানি সূক্ষ্মশরীরাণি সপ্তদশাবয়বানি স্বকারণেষু অপঞ্চীকৃতমহাভূতেষু বিলীয়ন্তে। তানি চ অপঞ্চীকৃতভূতানি সত্ত্বাদিগুণসহিতানি সর্বাণ্যেব স্বকারণভূতে অজ্ঞানোপহিতে চৈতন্যে লীনানি ভবন্তি।তচ্চাজ্ঞানং তদুপহিতচৈতন্যম্ ঈশ্বরাদিকং চ স্বাধারভূতে অনুপহিতে তুরীয়চৈতন্যে বিলীয়তে। এবম্ অন্তে তুরীয়চৈতন্যং ব্রহ্মৈব অবশিষ্যতে। অয়মেব কার্যস্য কারণমাত্রাবশেষণমপবাদঃ।